# shrIshArikAsahasranAmAvaliH

# શ્રીશારિકાસહસ્રનામાવલિઃ

## Document Information

Text title : ShArika SahasranAmAvali

File name : shArikAsahasranAmAvalI.itx

Category : sahasranAmAvalI, devii, shArikA, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, NA, PSA Easwaran

Latest update : May 23, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીશારિકાસહસ્રનામાવલિઃ

શ્રીગણેશાય નમઃ ।
શ્રીશારિકાયૈ નમઃ ।

વિનિયોગઃ -
અસ્ય શ્રીશારિકાભગવતીસહસ્રનામસ્તોત્રસ્ય શ્રીમહાદેવ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રીશારિકા ભગવતી દેવતા, શાં બીજં,
શ્રીં શક્તિઃ, ક્ષ્રાં કીલકં, ધર્માર્થકામમોક્ષાર્થે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ -
ૐ શ્રીમહાદેવઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રીશારિકાભગવતી દેવતાયૈ નમઃ હૃદયે ।
શાં બીજાય નમઃ દક્ષસ્તને ।
શ્રીં શક્તયે નમઃ વામસ્તને ।
ક્ષ્રાં કીલકાય નમઃ નાભૌ ।
શ્રીશારિકાભગવતી પ્રસાદસિદ્ધ્યર્થે પાઠે વિનિયોગાય નમઃ પાદયોઃ ॥

ષડઙ્ગન્યાસઃ ।

કરન્યાસઃ -
હ્રાં શ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । હ્રીં શ્રીં તર્જનીભ્યાં નમઃ ।
હ્રૂં શ્રૂં મધ્યમાભ્યાં નમઃ । હ્રૈં શ્રૈં અનામિકાભ્યાં નમઃ ।
હ્રૌં શ્રૌં કનિષ્ઠાભ્યાં નમઃ । હ્રઃ શ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અઙ્ગન્યાસઃ -
હ્રાં શ્રાં હૃદયાય નમઃ । હ્રીં શ્રીં શિરસે સ્વાહા ।
હ્રૂં શ્રૂં શિખાયૈ વષટ્ । હ્રૈં શ્રૈં કવચાય હુમ્ ।
હ્રૌં શ્રૌં નેત્રત્રયાય વૌષટ્ । હ્રઃ શ્રઃ અસ્ત્રાય ફટ્ ।

॥ ધ્યાનમ્ ॥

બાલાર્કકોટિસદૃશીમિન્દુચૂડાં કરામ્બુજૈઃ ।
વરચક્રાભયાસીંશ્ચ ધારયન્તીં હસન્મુખીમ્ ॥ ૧॥

સિંહારૂઢાં રક્તવસ્ત્રાં રક્તાભરણભૂષિતામ્ ।
વામદેવાઙ્કનિલયાં હૃત્પદ્મે શારિકાં ભજે ॥ ૨॥

બાલાર્કકોટિદ્યુતિમિન્દુચૂડાં વરાસિચક્રાભયબાહુમાદ્યામ્ ।
સિંહાધિરૂઢાં શિવવામદેહલીનાં ભજે ચેતસિ શારિકેશીમ્ ॥ ૩॥

અથ સહસ્રનામાવલિઃ ॥

ૐ શ્રીશારિકાયૈ નમઃ ।
ૐ શ્યામસુન્દર્યૈ નમઃ ।
ૐ શિલાયૈ નમઃ ।
ૐ શાર્યૈ નમઃ ।
ૐ શુક્યૈ નમઃ ।
ૐ શાન્તાયૈ નમઃ ।
ૐ શાન્તમાનસગોચરાયૈ નમઃ ।
ૐ શાન્તિસ્થાયૈ નમઃ ।
ૐ શાન્તિદાયૈ નમઃ ।
ૐ શાન્ત્યૈ નમઃ ।
ૐ શ્યામાયૈ નમઃ ।
ૐ શ્યામપયોધરાયૈ નમઃ ।
ૐ દેવ્યૈ નમઃ ।
ૐ શશાઙ્કબિમ્બાભાયૈ નમઃ ।
ૐ શશાઙ્કકૃતશેખરાયૈ નમઃ ।
ૐ શશાઙ્કશોભિલાવણ્યાયૈ નમઃ ।
ૐ શશાઙ્કમધ્યવાસિન્યૈ નમઃ ।
ૐ શાર્દૂરલવાહાયૈ નમઃ ।
ૐ દેવેશ્યૈ નમઃ ।
ૐ શાર્દૂલસ્થિત્યૈ નમઃ । ૨૦
ૐ ઉત્તમાયૈ નમઃ ।
ૐ શાર્દૂલચર્મવસનાયૈ નમઃ ।

ૐ શક્ત્યૈ નમઃ ।
ૐ શાર્દૂલવાહનાયૈ નમઃ ।
ૐ ગૌર્યૈ નમઃ ।
ૐ પદ્માવત્યૈ નમઃ ।
ૐ પીનાયૈ નમઃ ।
ૐ પીનવક્ષોજકુટ્મલાયૈ નમઃ ।
ૐ પીતામ્બરાયૈ નમઃ ।
ૐ રક્તદન્તાયૈ નમઃ ।
ૐ દાડિમીકુસુમોપમાયૈ નમઃ ।
ૐ સ્ફુરદ્રત્નાંશુખચિતાયૈ નમઃ ।
ૐ રત્નમણ્ડલવિગ્રહાયૈ નમઃ ।
ૐ રક્તામ્બરધરાયૈ નમઃ ।
ૐ દેવ્યૈ  નમઃ । -
ૐ રત્નમાલાવિભૂષણાયૈ નમઃ ।
ૐ રત્નસમ્મૂર્છિતાત્મને નમઃ ।
ૐ દીપ્તાયૈ નમઃ ।
ૐ દીપ્તશિખાયૈ નમઃ ।
ૐ દયાયૈ નમઃ ।  ૪૦
ૐ દયાવત્યૈ નમઃ ।
ૐ કલ્પલતાયૈ નમઃ ।
ૐ કલ્પાન્તદહનોપમાયૈ નમઃ ।
ૐ ભૈરવ્યૈ નમઃ ।
ૐ ભીમનાદાયૈ નમઃ ।
ૐ ભયાનકમુખ્યૈ નમઃ ।
ૐ ભગાયૈ નમઃ ।
ૐ કારાયૈ નમઃ ।
ૐ કારુણ્યરૂપાયૈ નમઃ ।
ૐ ભગમાલાવિભૂષણાયૈ નમઃ ।
ૐ ભગેશ્વર્યૈ નમઃ ।
ૐ ભગસ્થાયૈ નમઃ ।
ૐ કુરુકુલ્લાયૈ નમઃ ।
ૐ કૃશોદર્યૈ નમઃ ।

ૐ કાદમ્બર્યૈ નમઃ ।
ૐ પટોત્કૃષ્ટાયૈ નમઃ ।
ૐ પરમાયૈ નમઃ ।
ૐ પરમેશ્વર્યૈ નમઃ ।
ૐ સત્યૈ નમઃ ।
ૐ સરસ્વત્યૈ નમઃ । ૬૦
ૐ સત્યાયૈ નમઃ ।
ૐ સત્યાસત્યસ્વરૂપિણ્યૈ નમઃ ।
ૐ પરમ્પરાયૈ નમઃ ।
ૐ પટાકારાયૈ નમઃ ।
ૐ પાટલાયૈ નમઃ ।
ૐ પાટલપ્રભાયૈ નમઃ ।
ૐ પદ્મિન્યૈ નમઃ ।
ૐ પદ્મવદનાયૈ નમઃ ।
ૐ પદ્માયૈ નમઃ ।
ૐ પદ્માકરાયૈ નમઃ ।
ૐ શિવાયૈ નમઃ ।
ૐ શિવાશ્રયાયૈ નમઃ ।
ૐ શરચ્છાન્તાયૈ નમઃ ।
ૐ શચ્યૈ નમઃ ।
ૐ રમ્ભાયૈ નમઃ ।
ૐ વિભાવર્યૈ નમઃ ।
ૐ દ્યુમણયે નમઃ ।
ૐ તરણાયૈ નમઃ ।
ૐ પાઠાયૈ નમઃ ।
ૐ પીઠેશ્યૈ નમઃ । ૮૦
ૐ પીવરાકૃત્યૈ નમઃ ।
ૐ અચિન્ત્યાયૈ નમઃ ।
ૐ મુસલાધારાયૈ નમઃ ।
ૐ માતઙ્ગ્યૈ નમઃ ।
ૐ મધુરસ્વનાયૈ નમઃ ।
ૐ વીણાગીતપ્રિયાયૈ નમઃ ।

ૐ ગાથાયૈ નમઃ ।
ૐ ગારુડ્યૈ નમઃ ।
ૐ ગરુડધ્વજાયૈ નમઃ ।
ૐ અતીવ સુન્દરાકારાયૈ નમઃ ।
ૐ સુન્દર્યૈ નમઃ ।
ૐ સુન્દરાલકાયૈ નમઃ ।
ૐ અલકાયૈ નમઃ ।
ૐ નાકમધ્યસ્થાયૈ નમઃ ।
ૐ નાકિન્યૈ નમઃ ।
ૐ નાકિપૂજિતાયૈ નમઃ ।
ૐ પાતાલેશ્વરપૂજ્યાયૈ નમઃ ।
ૐ પાતાલતલચારિણ્યૈ નમઃ ।
ૐ અનન્તાયૈ નમઃ ।
ૐ અનન્તરૂપાયૈ નમઃ । ૧૦૦
ૐ અજ્ઞાતાયૈ નમઃ ।
ૐ જ્ઞાનવર્ધિન્યૈ નમઃ ।
ૐ અમેયાયૈ નમઃ ।
ૐ અપ્રમેયાયૈ નમઃ ।
ૐ અનન્તાયૈ નમઃ ।
ૐ આદિત્યરૂપિણ્યૈ નમઃ ।
ૐ દ્વાદશાદિત્યસમ્પૂજ્યાયૈ નમઃ ।
ૐ શમ્યૈ નમઃ ।
ૐ શ્યામાકબીજિન્યૈ નમઃ ।
ૐ વિભાસાયૈ નમઃ ।
ૐ ભાસુરવર્ણાયૈ નમઃ ।
ૐ સમસ્તાસુરઘાતિન્યૈ નમઃ ।
ૐ સુધામય્યૈ નમઃ ।
ૐ સુધામૂર્ત્યૈ નમઃ ।
ૐ સુધાયૈ નમઃ ।
ૐ સર્વપ્રિયઙ્કર્યૈ નમઃ ।
ૐ સુખદાયૈ નમઃ ।
ૐ સુરેશાન્યૈ નમઃ ।

ॐ કૃશાનુવલ્લભાયૈ નમઃ ।
ॐ હવિષે નમઃ । ૧૨૦
ॐ સ્વાહાયૈ નમઃ ।
ॐ સ્વાહેશનેત્રાયૈ નમઃ ।
ॐ અગ્નિવક્ત્રાયૈ નમઃ ।
ॐ અગ્નિતર્પિતાયૈ નમઃ ।
ॐ સોમસૂર્યાગ્નિનેત્રાયૈ નમઃ ।
ॐ ભૂર્ભુવઃસ્વઃસ્વરૂપિણ્યૈ નમઃ ।
ॐ ભૂમ્યૈ નમઃ ।
ॐ ભૂદેવપૂજ્યાયૈ નમઃ ।
ॐ સ્વયમ્ભુવે નમઃ ।
ॐ સ્વાત્મપૂજકાયૈ નમઃ ।
ॐ સ્વયમ્ભૂપુષ્પમાલાઢ્યાયૈ નમઃ ।
ॐ સ્વયમ્ભૂપુષ્પવલ્લભાયૈ નમઃ ।
ॐ આનન્દકન્દલ્યૈ નમઃ ।
ॐ કન્દાયૈ નમઃ ।
ॐ સ્કન્દમાત્રે નમઃ ।
ॐ શિલાલયાયૈ નમઃ ।
ॐ ચેતનાયૈ નમઃ ।
ॐ ચિદ્ભવાકારાયૈ નમઃ ।
ॐ ભવપત્ન્યૈ નમઃ ।
ॐ ભયાપહાયૈ નમઃ । ૧૪૦
ॐ વિઘ્નેશ્વર્યૈ નમઃ ।
ॐ ગણેશાન્યૈ નમઃ ।
ॐ વિઘ્નવિધ્વંસિન્યૈ નમઃ ।
ॐ નિશાયૈ નમઃ ।
ॐ વશ્યાયૈ નમઃ ।
ॐ વશિજનસ્તુત્યાયૈ નમઃ ।
ॐ સ્તુત્યૈ નમઃ ।
ॐ શ્રુતિધરાયૈ નમઃ ।
ॐ શ્રુત્યૈ નમઃ ।
ॐ શાસ્ત્રવિધાનવિજ્ઞાયૈ નમઃ ।

ॐ વેદશાસ્ત્રાર્થકોવિદાયૈ નમઃ ।

ॐ વેદ્યાયૈ નમઃ ।

ॐ વિદ્યામય્યૈ નમઃ ।

ॐ વેદમય્યૈ  નમઃ । -

ॐ વિદ્યાયૈ નમઃ ।

ॐ વિધાતૃવરદાયૈ નમઃ ।

ॐ વધ્વૈ નમઃ ।

ॐ વધૂરૂપાયૈ નમઃ ।

ॐ વધૂપૂજ્યાયૈ નમઃ ।

ॐ વધૂપાનપ્રતર્પિતાયૈ નમઃ ।  ૧૬૦

ॐ વધૂપૂજનસન્તુષ્ટાયૈ નમઃ ।

ॐ વધૂમાલાવિભૂષણાયૈ નમઃ ।

ॐ વામાયૈ નમઃ ।

ॐ વામેશ્વર્યૈ નમઃ ।

ॐ વામ્યાયૈ નમઃ ।

ॐ કુલાકુલવિચારિણ્યૈ નમઃ ।

ॐ વિતર્કતર્કનિલયાયૈ નમઃ ।

ॐ પ્રલયાનલસન્નિભાયૈ નમઃ ।

ॐ યજ્ઞેશ્વર્યૈ નમઃ ।

ॐ યજ્ઞમુખાયૈ નમઃ ।

ॐ યાજકાયૈ નમઃ ।

ॐ યજ્ઞપાત્રકાયૈ નમઃ ।

ॐ યક્ષેશ્વર્યૈ નમઃ ।

ॐ યક્ષધાત્ર્યૈ નમઃ ।

ॐ પાર્વત્યૈ નમઃ ।

ॐ પર્વતાશ્રયાયૈ નમઃ ।

ॐ પિલમ્પિલાયૈ નમઃ ।

ॐ પદસ્થાનાયૈ નમઃ ।

ॐ પદદાયૈ નમઃ ।

ॐ નરકાન્તકાયૈ નમઃ ।  ૧૮૦

ॐ નાર્યૈ નમઃ ।

ॐ નર્મપ્રિયાયૈ નમઃ ।

ૐ શ્રીદાયૈ નમઃ ।
ૐ શ્રીદશ્રીદાયૈ નમઃ ।
ૐ શરાયુધાયૈ નમઃ ।
ૐ કામેશ્વર્યૈ નમઃ ।
ૐ રત્યૈ નમઃ ।
ૐ હૂત્યૈ નમઃ ।
ૐ આહુત્યૈ નમઃ ।
ૐ હવ્યવાહનાયૈ નમઃ ।
ૐ હરેશ્વર્યૈ નમઃ ।
ૐ હરિવધ્વૈ નમઃ ।
ૐ હાટકાઙ્ગદમણ્ડિતાયૈ નમઃ ।
ૐ હપુષાયૈ નમઃ ।
ૐ સ્વર્ગત્યૈ નમઃ ।
ૐ વૈદ્યાયૈ નમઃ ।
ૐ સુમુખાયૈ નમઃ ।
ૐ મહૌષધ્યૈ નમઃ ।
ૐ સર્વરોગહરાયૈ નમઃ ।
ૐ માધ્વ્યૈ નમઃ । ૨૦૦
ૐ મધુપાનપરાયણાયૈ નમઃ ।
ૐ મધુસ્થિતાયૈ નમઃ ।
ૐ મધુમચ્યૈ નમઃ ।
ૐ મધુદાનવિશારદાયૈ નમઃ ।
ૐ મધુતૃપ્તાયૈ નમઃ ।
ૐ મધુરૂપાયૈ નમઃ ।
ૐ મધૂકકુસુમપ્રભાયૈ નમઃ ।
ૐ માધવ્યૈ નમઃ ।
ૐ માધવીવલ્લ્યૈ નમઃ ।
ૐ મધુમત્તાયૈ નમઃ ।
ૐ મદાલસાયૈ નમઃ ।
ૐ મારપ્રિયાયૈ નમઃ ।
ૐ મારપૂજ્યાયૈ નમઃ ।
ૐ મારદેવપ્રિયઙ્કર્યૈ નમઃ ।

ॐ મારેશ્યૈ નમઃ ।

ॐ મૃત્યુહરાયૈ નમઃ ।

ॐ હરિકાન્તાયૈ નમઃ ।

ॐ મનોન્મનાયૈ નમઃ ।

ॐ મહાવૈદ્યપ્રિયાયૈ નમઃ ।

ॐ વૈદ્યાયૈ નમઃ । ૨૨૦

ॐ વૈદ્યાચારાયૈ નમઃ ।

ॐ સુરાર્ચિતાયૈ નમઃ ।

ॐ સામન્તાયૈ નમઃ ।

ॐ પીનવપુષ્યૈ નમઃ ।

ॐ ગુટ્યૈ નમઃ ।

ॐ ગુર્વ્યૈ નમઃ ।

ॐ ગરીયસ્યૈ નમઃ ।

ॐ કાલાન્તકાયૈ નમઃ ।

ॐ કાલમુખ્યૈ નમઃ ।

ॐ કઠોરાયૈ નમઃ ।

ॐ કરુણામય્યૈ નમઃ ।

ॐ નીલાયૈ નમઃ ।

ॐ નાભ્યૈ નમઃ ।

ॐ વાગીશ્યૈ નમઃ ।

ॐ દૂર્વાયૈ નમઃ ।

ॐ નીલસરસ્વત્યૈ નમઃ ।

ॐ અપારાયૈ નમઃ ।

ॐ પારગાયૈ નમઃ ।

ॐ ગમ્યાયૈ નમઃ ।

ॐ ગત્યૈ નમઃ । ૨૪૦

ॐ પ્રીત્યૈ નમઃ ।

ॐ પયોધરાયૈ નમઃ ।

ॐ પયોદસદૃશચ્છાયાયૈ નમઃ ।

ॐ પારદાકૃતિલાલસાયૈ નમઃ ।

ॐ સરોજનિલયાયૈ નમઃ ।

ॐ નીત્યૈ નમઃ ।

ૐ કીર્ત્યૈ નમઃ ।
ૐ કીર્તિકર્યૈ નમઃ ।
ૐ કથાયૈ નમઃ ।
ૐ કાશ્યૈ નમઃ ।
ૐ કામ્યાયૈ નમઃ ।
ૐ કપર્દીશાયૈ નમઃ ।
ૐ કાશપુષ્પોપમાયૈ નમઃ ।
ૐ રમાયૈ નમઃ ।
ૐ રામાયૈ નમઃ ।
ૐ રામપ્રિયાયૈ નમઃ ।
ૐ રામભદ્રદેવસમર્ચિતાયૈ નમઃ ।
ૐ રામસમ્પૂજિતાયૈ નમઃ ।
ૐ રામસિદ્ધિદાયૈ નમઃ ।
ૐ રામરાજ્યદાયૈ નમઃ । ૨૬૦
ૐ રામભદ્રાર્ચિતાયૈ નમઃ ।
ૐ રેવાયૈ નમઃ ।
ૐ દેવક્યૈ નમઃ ।
ૐ દેવવત્સલાયૈ નમઃ ।
ૐ દેવપૂજ્યાયૈ નમઃ ।
ૐ દેવવન્દ્યાયૈ નમઃ ।
ૐ દેવદાવનચર્ચિતાયૈ નમઃ ।
ૐ દૂત્યૈ નમઃ ।
ૐ દ્રુતગત્યૈ નમઃ ।
ૐ દમ્ભાયૈ નમઃ ।
ૐ દામિન્યૈ નમઃ ।
ૐ વિજયાયૈ નમઃ ।
ૐ જયાયૈ નમઃ ।
ૐ અશેષસુરસમ્પૂજ્યાયૈ નમઃ ।
ૐ નિઃશેષાસુરસૂદિન્યૈ નમઃ ।
ૐ વટિન્યૈ નમઃ ।
ૐ વટમૂલસ્થાયૈ નમઃ ।
ૐ લાસ્યહાસ્યૈકવલ્લભાયૈ નમઃ ।

ૐ અરુપાયૈ નમઃ ।
ૐ નિર્ગુણાયૈ નમઃ । ૨૮૦
ૐ સત્યાયૈ નમઃ ।
ૐ સદાસન્તોષવર્ધિન્યૈ નમઃ ।
ૐ સૌમ્યાયૈ નમઃ ।
ૐ યજુર્વહાયૈ નમઃ ।
ૐ યામ્યાયૈ નમઃ ।
ૐ યમુનાયૈ નમઃ ।
ૐ યામિન્યૈ નમઃ ।
ૐ યમ્યૈ નમઃ ।
ૐ દાક્ષાયૈ નમઃ ।
ૐ દયાયૈ નમઃ ।
ૐ વરદાયૈ નમઃ ।
ૐ દાલ્ભ્યસેવ્યાયૈ નમઃ ।
ૐ પુરન્દર્યૈ નમઃ ।
ૐ પૌરન્દર્યૈ નમઃ ।
ૐ પુલોમેશ્યૈ નમઃ ।
ૐ પૌલોમ્યૈ નમઃ ।
ૐ પુલકાઙ્કુરાયૈ નમઃ ।
ૐ પુરસ્થાયૈ નમઃ ।
ૐ વનભુવે નમઃ ।
ૐ વન્યાયૈ નમઃ । ૩૦૦
ૐ વાનર્યૈ નમઃ ।
ૐ વનચારિણ્યૈ નમઃ ।
ૐ સમસ્તવર્ણનિલયાયૈ નમઃ ।
ૐ સમસ્તવર્ણપૂજિતાયૈ નમઃ ।
ૐ સમસ્તવરવર્ણાઢ્યાયૈ નમઃ ।
ૐ સમસ્તગુરુવલ્લભાયૈ નમઃ ।
ૐ સમસ્તમુણ્ડમાલાઢ્યાયૈ નમઃ ।
ૐ માલિન્યૈ નમઃ ।
ૐ મધુપસ્વનાયૈ નમઃ ।
ૐ કોશપ્રદાયૈ નમઃ ।

ૐ કોશવાસાયૈ નમઃ ।
ૐ ચમત્કૃત્યૈ નમઃ ।
ૐ અલમ્બુસાયૈ નમઃ ।
ૐ હાસદાયૈ નમઃ ।
ૐ સદસદ્રૂપાયૈ નમઃ ।
ૐ સર્વવર્ણમય્યૈ નમઃ ।
ૐ સ્મૃત્યૈ નમઃ ।
ૐ સર્વાક્ષરમય્યૈ નમઃ ।
ૐ વિદ્યાયૈ નમઃ ।
ૐ મૂલવિદ્યેશ્વર્યૈ નમઃ । ૩૨૦
ૐ ઈશ્વર્યૈ નમઃ ।
ૐ અકારાયૈ નમઃ ।
ૐ ષોડશાકારાયૈ નમઃ ।
ૐ કારાબન્ધવિમોચિન્યૈ નમઃ ।
ૐ કકારવ્યઞ્જનાયૈ નમઃ ।
ૐ આક્રાન્તાયૈ નમઃ ।
ૐ સર્વમન્ત્રાક્ષરાલયાયૈ નમઃ ।
ૐ અણુરૂપાયૈ નમઃ ।
ૐ અમાલાયૈ નમઃ ।
ૐ ત્રૈગુણ્યાયૈ નમઃ ।
ૐ અપરાજિતાયૈ નમઃ ।
ૐ અમ્બિકાયૈ નમઃ ।
ૐ અમ્બાલિકાયૈ નમઃ ।
ૐ અમ્બાયૈ નમઃ ।
ૐ અનન્તગુણમેખલાયૈ નમઃ ।
ૐ અપર્ણાયૈ નમઃ ।
ૐ પર્ણશાલાયૈ નમઃ ।
ૐ સાટ્ટહાસાયૈ નમઃ ।
ૐ હસન્તિકાયૈ નમઃ ।
ૐ અદ્રિકન્યાયૈ નમઃ । ૩૪૦
ૐ અટ્ટહાસાયૈ નમઃ ।
ૐ અજરાયૈ નમઃ ।

ॐ અસ્યાયૈ નમઃ । -
ॐ અરુન્ધત્યૈ નમઃ ।
ॐ અબ્જાક્ષ્યૈ નમઃ ।
ॐ અબ્જિન્યૈ નમઃ ।
ॐ દેવ્યૈ નમઃ । -
ॐ અમ્બુજાસનપૂજિતાયૈ નમઃ ।
ॐ અબ્જહસ્તાયૈ નમઃ ।
ॐ અબ્જપાદાયૈ નમઃ ।
ॐ અબ્જપૂજનતોષિતાયૈ નમઃ ।
ॐ અકારમાતૃકાયૈ નમઃ ।
ॐ દેવ્યૈ નમઃ । -
ॐ સર્વાનન્દકર્યૈ નમઃ ।
ॐ કલાયૈ નમઃ ।
ॐ આનન્દસુન્દર્યૈ નમઃ ।
ॐ આદ્યાયૈ નમઃ ।
ॐ આઘૂર્ણારુણલોચનાયૈ નમઃ ।
ॐ આદિદેવાન્તકાયૈ નમઃ ।
ॐ અક્રૂરાયૈ નમઃ । ૩૬૦
ॐ આદિત્યકુલભૂષણાયૈ નમઃ ।
ॐ આમ્બીજમણ્ડનાયૈ નમઃ ।
ॐ દેવ્યૈ નમઃ । -
ॐ આકારમાતૃકાવલ્યૈ નમઃ ।
ॐ ઇન્દુસ્તુતાયૈ નમઃ ।
ॐ ઇન્દુબિમ્બાસ્યાયૈ નમઃ ।
ॐ ઇનકોટિસમપ્રભાયૈ નમઃ ।
ॐ ઇન્દિરાયૈ નમઃ ।
ॐ મન્દુરાશાલાયૈ નમઃ ।
ॐ ઇતિહાસાયૈ નમઃ ।
ॐ કથાયૈ નમઃ ।
ॐ સ્મૃત્યૈ નમઃ ।
ॐ ઇલાયૈ નમઃ ।
ॐ ઇક્ષુરસાસ્વાદાયૈ નમઃ ।

ૐ ઇકારાક્ષરભૂષિતાયૈ નમઃ ।
ૐ ઇન્દ્રસ્તુતાયૈ નમઃ ।
ૐ ઇન્દ્રપૂજ્યાયૈ નમઃ ।
ૐ ઇન્દુબિમ્બાસ્યાયૈ નમઃ ।
ૐ ઇનભદ્રાયૈ નમઃ ।
ૐ ઇનેશ્વર્યૈ નમઃ । ૩૮૦
ૐ ઇભગત્યૈ નમઃ ।
ૐ ઇભગીત્યૈ નમઃ ।
ૐ ઇકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ઈશ્વર્યૈ નમઃ ।
ૐ ભવપ્રખ્યાયૈ નમઃ ।
ૐ ઈશાન્યૈ નમઃ ।
ૐ ઈશ્વરવલ્લભાયૈ નમઃ ।
ૐ ઈશાયૈ નમઃ ।
ૐ કામકલાયૈ નમઃ ।
ૐ દેવ્યૈ  નમઃ । -
ૐ ઈકારાશ્રિતમાતૃકાયૈ નમઃ ।
ૐ ઉગ્રપ્રભાયૈ નમઃ ।
ૐ ઉગ્રચિત્તાયૈ નમઃ ।
ૐ ઉગ્રવામાઙ્ગવાસિન્યૈ નમઃ ।
ૐ ઉષાયૈ નમઃ ।
ૐ વૈષ્ણવપૂજ્યાયૈ નમઃ ।
ૐ ઉગ્રતારાયૈ નમઃ ।
ૐ ઉલ્મુકાનનાયૈ નમઃ ।
ૐ ઉમેશ્વર્યૈ નમઃ ।
ૐ ઈશ્વર્યૈ નમઃ । ૪૦૦
ૐ શ્રેષ્ઠાયૈ નમઃ ।
ૐ ઉદકસ્થાયૈ નમઃ ।
ૐ ઉદેશ્વર્યૈ નમઃ ।
ૐ ઉદકાયૈ નમઃ ।
ૐ અચ્છોદકદાયૈ નમઃ ।
ૐ ઉકારોદ્ભાસમાતૃકાયૈ નમઃ ।

ૐ ઊષ્માયૈ નમઃ ।

ૐ ઊષાયૈ નમઃ ।

ૐ ઊષણાયૈ નમઃ ।

ૐ ઉચિતવરપ્રદાયૈ નમઃ ।

ૐ ઋણહર્ત્ર્યૈ નમઃ ।

ૐ ૠકારેશ્યૈ નમઃ ।

ૐ ૠલ્વર્ણાયૈ નમઃ ।

ૐ ૡવર્ણભાજે નમઃ ।

ૐ ૡકારભ્રુકુટ્યૈ નમઃ ।

ૐ બાલાયૈ નમઃ ।

ૐ બાલાદિત્યસમપ્રભાયૈ નમઃ ।

ૐ એણાઙ્કમુકુટાયૈ નમઃ ।

ૐ ઈહાયૈ નમઃ ।

ૐ એકારાક્ષરબીજિતાયૈ નમઃ । ૪૨૦

ૐ એણપ્રિયાયૈ નમઃ ।

ૐ એણમધ્યવાસિન્યૈ નમઃ ।

ૐ એણવત્સલાયૈ નમઃ ।

ૐ એણાઙ્કમધ્યસંસ્થાયૈ નમઃ ।

ૐ એકારોદ્ભાસકૂટિન્યૈ નમઃ ।

ૐ ઐકારોદ્ભાસકૂટિન્યૈ નમઃ ।

ૐ ઓઙ્કારશેખરાયૈ નમઃ ।

ૐ દેવ્યૈ  નમઃ । -

ૐ ઔચિત્યપદમણ્ડિતાયૈ નમઃ ।

ૐ અમ્ભોજનિલયસ્થાનાયૈ નમઃ ।

ૐ અઃસ્વરૂપાયૈ નમઃ ।

ૐ સ્વર્ગત્યૈ નમઃ ।

ૐ ષોડશસ્વરરૂપાયૈ નમઃ ।

ૐ ષોડશસ્વરગાયિન્યૈ નમઃ ।

ૐ ષોડશ્યૈ નમઃ ।

ૐ ષોડશાકારાયૈ નમઃ ।

ૐ કમલાયૈ નમઃ ।

ૐ કમલોદ્ભવાયૈ નમઃ ।

ॐ કામેશ્વર્યૈ કામેશ્વરાયૈ  નમઃ । -
ॐ કલાભિજ્ઞાયૈ નમઃ ।  ૪૪૦
ॐ કુમાર્યૈ નમઃ ।
ॐ કુટિલાલકાયૈ નમઃ ।
ॐ કુટિલાયૈ નમઃ ।
ॐ કુટિલાકારાયૈ નમઃ ।
ॐ કુટુમ્બસંયુતાયૈ નમઃ ।
ॐ શિવાયૈ નમઃ ।
ॐ કુલાકુલપદેશાન્યૈ નમઃ ।
ॐ કુલેશ્યૈ નમઃ ।
ॐ કુબ્જિકાયૈ નમઃ ।
ॐ કલાયૈ નમઃ ।
ॐ કામાયૈ નમઃ ।
ॐ કામપ્રિયાયૈ નમઃ ।
ॐ કીરાયૈ નમઃ ।
ॐ કમનીયાયૈ નમઃ ।
ॐ કપર્દિન્યૈ નમઃ ।
ॐ કાલિકાયૈ નમઃ ।
ॐ ભદ્રકાલ્યૈ નમઃ ।
ॐ કાલકામાન્તકારિણ્યૈ નમઃ ।
ॐ કપાલિન્યૈ નમઃ ।
ॐ કપાલેશ્યૈ નમઃ ।  ૪૬૦
ॐ કર્પૂરચયચર્ચિતાયૈ નમઃ ।
ॐ કાદમ્વર્યૈ નમઃ ।
ॐ કોમલાઙ્ગ્યૈ નમઃ ।
ॐ કાશ્મીર્યૈ નમઃ ।
ॐ કુઙ્કુમદ્યુત્યૈ નમઃ ।
ॐ કુન્તાયૈ નમઃ ।
ॐ કૂર્ચાર્ણબીજાઢ્યાયૈ નમઃ ।
ॐ કમનીયાયૈ નમઃ ।
ॐ કુલાકુલાયૈ નમઃ ।
ॐ કરાલાસ્યાયૈ નમઃ ।

ૐ કરાલાક્ષ્યૈ નમઃ ।
ૐ વિકરાલસ્વરૂપિણ્યૈ નમઃ ।
ૐ કામ્યાલકાયૈ નમઃ ।
ૐ કામદુઘાયૈ નમઃ ।
ૐ કામિન્યૈ નમઃ ।
ૐ કામપાલિન્યૈ નમઃ ।
ૐ કન્થાધરાયૈ નમઃ ।
ૐ કૃપાકર્ત્ર્યૈ નમઃ ।
ૐ કકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ખડ્ગહસ્તાયૈ નમઃ । ૪૮૦
ૐ ખર્પરેશ્યૈ નમઃ ।
ૐ ખેચર્યૈ નમઃ ।
ૐ ખગગામિન્યૈ નમઃ ।
ૐ ખેચરીમુદ્રયા યુક્તાયૈ નમઃ ।
ૐ ખેચરત્વપ્રદાયિન્યૈ નમઃ ।
ૐ ખગાસનાયૈ નમઃ ।
ૐ ખલોલાક્ષ્યૈ નમઃ ।
ૐ ખેટેશ્યૈ નમઃ ।
ૐ ખલનાશિન્યૈ નમઃ ।
ૐ ખેવટકાયુધહસ્તાયૈ નમઃ ।
ૐ ખરાંશુદ્યુતિસન્નિભાયૈ નમઃ ।
ૐ ખાન્તાયૈ નમઃ ।
ૐ ખબીજનિલયાયૈ નમઃ ।
ૐ ખકારોલ્લાસમાતૃકાયૈ નમઃ ।
ૐ વૈખર્યૈ નમઃ ।
ૐ બીજનિલયાયૈ નમઃ ।
ૐ ખસ્થાયૈ નમઃ ।
ૐ ખેચરવલ્લભાયૈ નમઃ ।
ૐ ગુણ્યાયૈ નમઃ ।
ૐ ગજાસ્યજનન્યૈ નમઃ । ૫૦૦
ૐ ગણેશવરદાયૈ નમઃ ।
ૐ ગયાયૈ નમઃ ।

ૐ ગોદાવર્યૈ નમઃ ।
ૐ ગદાહસ્તાયૈ નમઃ ।
ૐ ગઙ્ગાધરવરપ્રદાયૈ નમઃ ।
ૐ ગોધાયૈ નમઃ ।
ૐ ગોવાહનેશાન્યૈ નમઃ ।
ૐ ગરલાશનવલ્લભાયૈ નમઃ ।
ૐ ગામ્ભીર્યભૂષણાયૈ નમઃ ।
ૐ ગઙ્ગાયૈ નમઃ ।
ૐ ગકારાર્ણવિભૂષણાયૈ નમઃ ।
ૐ ઘૃણાયૈ નમઃ ।
ૐ ઘોણાકરસ્તુત્યાયૈ નમઃ ।
ૐ ઘુર્ઘુરાયૈ નમઃ ।
ૐ ઘોરનાદિન્યૈ નમઃ ।
ૐ ઘટસ્થાયૈ નમઃ ।
ૐ ઘટજસેવ્યાયૈ નમઃ ।
ૐ ઘનરૂપાયૈ નમઃ ।
ૐ ઘુણેશ્વર્યૈ નમઃ ।
ૐ ઘનવાહનસેવ્યાયૈ નમઃ । ૫૨૦
ૐ ઘકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ઙાન્તાયૈ નમઃ ।
ૐ ઙવર્ણનિલયાયૈ નમઃ ।
ૐ ઙાણુરૂપાયૈ નમઃ ।
ૐ ઙણાલયાયૈ નમઃ ।
ૐ ઙેશાયૈ નમઃ ।
ૐ ઙેન્તાયૈ નમઃ ।
ૐ ઙનાજાપ્યાયૈ નમઃ ।
ૐ ઙવર્ણાક્ષરભૂષણાયૈ નમઃ ।
ૐ ચામીકરરુચયે નમઃ ।
ૐ ચાન્દ્યૈ નમઃ ।
ૐ ચન્દ્રિકાયૈ નમઃ ।
ૐ ચન્દ્રરાગિણ્યૈ નમઃ ।
ૐ ચલાયૈ નમઃ ।

ૐ ચલચ્ચલાયૈ નમઃ ।

ૐ ચેલાયૈ નમઃ ।

ૐ ચન્દ્રાયૈ નમઃ ।

ૐ ચન્દ્રકરાયૈ નમઃ ।

ૐ ચલ્યૈ નમઃ ।

ૐ ચઞ્ચુરીકસ્વનાલાપાયૈ નમઃ । ૫૪૦

ૐ ચમત્કારસ્વરૂપિણ્યૈ નમઃ ।

ૐ ચટુલ્યૈ નમઃ ।

ૐ ચાટુક્યૈ નમઃ ।

ૐ ચાર્વ્યૈ નમઃ ।

ૐ ચમ્પાયૈ નમઃ ।

ૐ ચમ્પકસન્નિભાયૈ નમઃ ।

ૐ ચીનાંશુકધરાયૈ નમઃ ।

ૐ ચાટ્વ્યૈ નમઃ ।

ૐ ચકારાર્ણવિભૂષણાયૈ નમઃ ।

ૐ છત્ર્યૈ નમઃ ।

ૐ છત્રધરાયૈ નમઃ ।

ૐ છિન્નાયૈ નમઃ ।

ૐ છિન્નમસ્તાયૈ નમઃ ।

ૐ છટચ્છવયે નમઃ ।

ૐ છાયાસુતપ્રિયાયૈ નમઃ ।

ૐ છાયાયૈ નમઃ ।

ૐ છવર્ણામલમાતૃકાયૈ નમઃ ।

ૐ જગદમ્બાયૈ નમઃ ।

ૐ જગજ્જ્યોતિષે નમઃ ।

ૐ જ્યોતીરૂપાયૈ નમઃ । ૫૬૦

ૐ જટાધરાયૈ નમઃ ।

ૐ જયદાયૈ નમઃ ।

ૐ જયકર્ત્ર્યૈ નમઃ ।

ૐ જયસ્થાયૈ નમઃ ।

ૐ જયહાસિન્યૈ નમઃ ।

ૐ જગત્પ્રિયાયૈ નમઃ ।

ૐ જગત્પૂજ્યાયૈ નમઃ ।
ૐ જગત્કર્ત્ર્યૈ નમઃ ।
ૐ જરાતુરાયૈ નમઃ ।
ૐ જ્વરઘ્ન્યૈ નમઃ ।
ૐ જમ્ભદમન્યૈ નમઃ ।
ૐ જગત્પ્રાણાયૈ નમઃ ।
ૐ જયાવહાયૈ નમઃ ।
ૐ જમ્ભારિવરદાયૈ નમઃ ।
ૐ જૈત્ર્યૈ નમઃ ।
ૐ જીવનાયૈ નમઃ ।
ૐ જીવવાક્પ્રદાયૈ નમઃ ।
ૐ જાગ્રત્યૈ નમઃ ।
ૐ જગન્નિદ્રાયૈ નમઃ ।
ૐ જગદ્યોન્યૈ નમઃ । ૫૮૦
ૐ જલન્ધરાયૈ નમઃ ।
ૐ જાલન્ધરધરાયૈ નમઃ ।
ૐ જાયાયૈ નમઃ ।
ૐ જકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ઝમ્પાયૈ નમઃ ।
ૐ ઝિઞ્ઝેશ્વર્યૈ નમઃ ।
ૐ ઝાન્તાયૈ નમઃ ।
ૐ ઝકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ઞાણુરૂપાયૈ નમઃ ।
ૐ ઞિણાવાસાયૈ નમઃ ।
ૐ ઞકોરેશ્યૈ નમઃ ।
ૐ ઞણાયુધાયૈ નમઃ ।
ૐ ઞવર્ગબીજભૂષાઢ્યાયૈ નમઃ ।
ૐ ઞકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ટઙ્કાયુધાયૈ નમઃ ।
ૐ ટકારાઢ્યાયૈ નમઃ ।
ૐ ટોટાક્ષ્યૈ નમઃ ।
ૐ ટસુકુન્તલાયૈ નમઃ ।

ॐ ટઙ્કાયુધાયૈ નમઃ ।
ॐ ટલીરૂપાયૈ નમઃ । ૬૦૦
ॐ ટકારાક્ષરમાતૃકાયૈ નમઃ ।
ॐ ઠક્કુરાયૈ નમઃ ।
ॐ ઠક્કુરેશાન્યૈ નમઃ ।
ॐ ઠકારત્રિતયેશ્વર્યૈ નમઃ ।
ॐ ઠઃસ્વરૂપાયૈ નમઃ ।
ॐ ઠવર્ણાઢ્યાયૈ નમઃ ।
ॐ ઠકારાક્ષરમાતૃકાયૈ નમઃ ।
ॐ ડક્કાયૈ નમઃ ।
ॐ ડક્કેશ્વર્યૈ નમઃ ।
ॐ ડિમ્ભાયૈ નમઃ ।
ॐ ડવર્ણાક્ષરમાતૃકાયૈ નમઃ ।
ॐ ઢિણ્યૈ નમઃ ।
ॐ ઢેહાયૈ નમઃ ।
ॐ ઢિલ્લહસ્તાયૈ નમઃ ।
ॐ ઢકારાક્ષરમાતૃકાયૈ નમઃ ।
ॐ ણેશાયૈ નમઃ ।
ॐ ણાન્તાયૈ નમઃ ।
ॐ ણવર્ગાન્તાયૈ નમઃ ।
ॐ ણકારાક્ષરભૂષણાયૈ નમઃ ।
ॐ તુર્યૈ નમઃ । ૬૨૦
ॐ તુર્યાયૈ નમઃ ।
ॐ તુલારૂપાયૈ નમઃ ।
ॐ ત્રિપુરાયૈ નમઃ ।
ॐ તામસપ્રિયાયૈ નમઃ ।
ॐ તોતુલાયૈ નમઃ ।
ॐ તારિણ્યૈ નમઃ ।
ॐ તારાયૈ નમઃ ।
ॐ સપ્તવિંશતિરૂપિણ્યૈ નમઃ ।
ॐ ત્રિપુરાયૈ નમઃ ।
ॐ ત્રિગુણાયૈ નમઃ ।

ૐ ધ્યેયાયૈ નમઃ ।
ૐ ત્ર્યમ્બકેશ્યૈ નમઃ ।
ૐ ત્રિલોકધૃતે નમઃ ।
ૐ ત્રિવર્ગેશ્યૈ નમઃ ।
ૐ ત્રય્યૈ નમઃ ।
ૐ ત્ર્યક્ષ્યૈ નમઃ ।
ૐ ત્રિપદાયૈ નમઃ ।
ૐ વેદરૂપિણ્યૈ નમઃ ।
ૐ ત્રિલોકજનન્યૈ નમઃ ।
ૐ ત્રાત્રે નમઃ । ૬૪૦
ૐ ત્રિપુરેશ્વરપૂજિતાયૈ નમઃ ।
ૐ ત્રિકોણસ્થાયૈ નમઃ ।
ૐ ત્રિકોણેશ્યૈ નમઃ ।
ૐ કોણત્રયનિવાસિન્યૈ નમઃ ।
ૐ ત્રિકોણપૂજનતુષ્ટાયૈ નમઃ ।
ૐ ત્રિકોણપૂજનશ્રિતાયૈ નમઃ ।
ૐ ત્રિકોણદાનસંલગ્નાયૈ નમઃ ।
ૐ સર્વકોણશુભાર્થદાયૈ નમઃ ।
ૐ વસુકોણસ્થિતાયૈ નમઃ ।
ૐ દેવ્યૈ  નમઃ । -
ૐ વસુકોણાર્થવાદિન્યૈ નમઃ ।
ૐ વસુકોણપૂજિતાયૈ નમઃ ।
ૐ ષટ્ચક્રક્રમવાસિન્યૈ નમઃ ।
ૐ નાગપત્રસ્થિતાયૈ નમઃ ।
ૐ શાર્યૈ નમઃ ।
ૐ ત્રિવૃત્તપૂજનાર્થદાયૈ નમઃ ।
ૐ ચતુર્દ્વારાગ્રગાયૈ નમઃ ।
ૐ ચક્રબાહ્યાન્તરનિવાસિન્યૈ નમઃ ।
ૐ તામસ્યૈ નમઃ ।
ૐ તોમરપ્રખ્યાયૈ નમઃ । ૬૬૦
ૐ તુમ્બુરુસ્વનનાદિન્યૈ નમઃ ।
ૐ તુલાકોટિસ્વનાયૈ નમઃ ।

ૐ તાપ્યૈ નમઃ ।
ૐ તપસાં ફલવર્ધિન્યૈ નમઃ ।
ૐ તરલાક્ષ્યૈ નમઃ ।
ૐ તમોહર્ત્ર્યૈ નમઃ ।
ૐ તારકાસુરઘાતિન્યૈ નમઃ ।
ૐ તર્યૈ નમઃ ।
ૐ તરણિરૂપાયૈ નમઃ ।
ૐ તકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ સ્થલ્યૈ નમઃ ।
ૐ સ્થવિરરૂપાયૈ નમઃ ।
ૐ સ્થૂલાયૈ નમઃ ।
ૐ સ્થાલ્યૈ નમઃ ।
ૐ સ્થલાબ્જિન્યૈ નમઃ ।
ૐ સ્થાવરેશાયૈ નમઃ ।
ૐ સ્થૂલમૂર્ખ્યૈ નમઃ ।
ૐ થકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ દૂતિકાયૈ નમઃ ।
ૐ શિવદૂત્યૈ નમઃ । ૬૮૦
ૐ દણ્ડાયુધધરાયૈ નમઃ ।
ૐ દ્યુત્યૈ નમઃ ।
ૐ દયાયૈ નમઃ ।
ૐ દીનાનુકમ્પાયૈ નમઃ ।
ૐ દમ્ભોલિધરવલ્લભાયૈ નમઃ ।
ૐ દેશાનુચારિણ્યૈ નમઃ ।
ૐ દ્રેક્કાયૈ નમઃ ।
ૐ દ્રાવિડેશ્યૈ નમઃ ।
ૐ દવીયસ્યૈ નમઃ ।
ૐ દાક્ષાયણ્યૈ નમઃ ।
ૐ દ્રુમલતાયૈ નમઃ ।
ૐ દેવમાત્રે નમઃ ।
ૐ અધિદેવતાયૈ નમઃ ।
ૐ દધિજાયૈ નમઃ ।

ૐ દુર્લભાયૈ નમઃ ।
ૐ દેવ્યૈ -? નમઃ ।
ૐ દેવતાયૈ નમઃ ।
ૐ પરમાક્ષરાયૈ નમઃ ।
ૐ દામોદરસુપૂજ્યાયૈ નમઃ ।
ૐ દામોદરવરપ્રદાયૈ નમઃ । ૭૦૦
ૐ દનુપુત્ર્યૈ નમઃ ।
ૐ વિનાશાયૈ નમઃ ।
ૐ દનુપુત્રકુલાર્ચિતાયૈ નમઃ ।
ૐ દણ્ડહસ્તાયૈ નમઃ ।
ૐ દણ્ડિપૂજ્યાયૈ નમઃ ।
ૐ દમદાયૈ નમઃ ।
ૐ દમસ્થિતાયૈ નમઃ ।
ૐ દશધેનુસુરૂપાયૈ નમઃ ।
ૐ દકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ધર્મ્યાયૈ નમઃ ।
ૐ ધર્મપ્રસવે નમઃ ।
ૐ ધન્યાયૈ નમઃ ।
ૐ ધનદાયૈ નમઃ ।
ૐ ધનવર્ધિન્યૈ નમઃ ।
ૐ ધૃત્યૈ નમઃ ।
ૐ ધૂત્યૈ નમઃ ।
ૐ ધૂર્તાયૈ  નમઃ । -
ૐ ધન્યવધ્વૈ નમઃ ।
ૐ ધકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ નલિન્યૈ નમઃ । ૭૨૦
ૐ નાલિકાયૈ નમઃ ।
ૐ નાપ્યાયૈ નમઃ ।
ૐ નારાચાયુધધારિણ્યૈ નમઃ ।
ૐ નીપોપવનમધ્યસ્થાયૈ નમઃ ।
ૐ નાગરેશ્યૈ નમઃ ।
ૐ નરોત્તમાયૈ નમઃ ।

ૐ નરેશ્વર્યૈ નમઃ ।
ૐ નૃપારાધ્યાયૈ નમઃ ।
ૐ નૃપપૂજ્યાયૈ નમઃ ।
ૐ નૃપાર્થદાયૈ નમઃ ।
ૐ નૃપસેવ્યાયૈ નમઃ ।
ૐ નૃપવન્દ્યાયૈ નમઃ ।
ૐ નરનારાયણપ્રસુવે નમઃ ।
ૐ નર્તક્યૈ નમઃ ।
ૐ નીરજાક્ષ્યૈ નમઃ ।
ૐ નવર્ણાક્ષરભૂષણાયૈ નમઃ ।
ૐ પદ્મેશ્વર્યૈ નમઃ ।
ૐ પદ્મમુખ્યૈ નમઃ ।
ૐ પત્રયાનાયૈ નમઃ ।
ૐ પરાપરાયૈ નમઃ । ૭૪૦
ૐ પારાવારસુતાયૈ નમઃ ।
ૐ પાઠાયૈ નમઃ ।
ૐ પરવર્ગવિમર્દિન્યૈ નમઃ ।
ૐ પુવે નમઃ ।
ૐ પુરારિવધ્વૈ નમઃ ।
ૐ પમ્પાયૈ નમઃ ।
ૐ પત્ન્યૈ નમઃ ।
ૐ પત્રીશવાહનાયૈ નમઃ ।
ૐ પીવરાંસાયૈ નમઃ ।
ૐ પતિપ્રાણાયૈ નમઃ ।
ૐ પીતલાક્ષ્યૈ નમઃ ।
ૐ પતિવ્રતાયૈ નમઃ ।
ૐ પીઠાયૈ નમઃ ।
ૐ પીઠસ્થિતાયૈ નમઃ ।
ૐ અપીઠાયૈ નમઃ ।
ૐ પીતાલઙ્કારભૂષણાયૈ નમઃ ।
ૐ પુરૂરવઃસ્તુતાયૈ નમઃ ।
ૐ પાત્ર્યૈ નમઃ ।

ૐ પુત્રિકાયૈ નમઃ ।
ૐ પુત્રદાયૈ નમઃ । ૭૬૦
ૐ પ્રજાયૈ નમઃ ।
ૐ પુષ્પોત્તંસાયૈ નમઃ ।
ૐ પુષ્પવત્યૈ નમઃ ।
ૐ પુષ્પમાલાવિભૂષણાયૈ નમઃ ।
ૐ પુષ્પમાલાતિશોભાઢ્યાયૈ નમઃ ।
ૐ પકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ ફલદાયૈ નમઃ ।
ૐ સ્ફીતવસ્ત્રાયૈ નમઃ ।
ૐ ફેરવારાવભીષણાયૈ નમઃ ।
ૐ ફલ્ગુન્યૈ નમઃ ।
ૐ ફલ્ગુતીર્થસ્થાયૈ નમઃ ।
ૐ ફવર્ણકૃતમણ્ડલાયૈ નમઃ ।
ૐ બલદાયૈ નમઃ ।
ૐ બાલખિલ્યાયૈ નમઃ ।
ૐ બાલાયૈ નમઃ ।
ૐ બલરિપુપ્રિયાયૈ નમઃ ।
ૐ બાલ્યાવસ્થાયૈ નમઃ ।
ૐ બર્બરેશ્યૈ નમઃ ।
ૐ બકારાકૃતિમાતૃકાયૈ નમઃ ।
ૐ ભદ્રિકાયૈ નમઃ । ૭૮૦
ૐ ભીમપત્ન્યૈ નમઃ ।
ૐ ભીમાયૈ નમઃ ।
ૐ ભર્ગશિખાયૈ નમઃ ।
ૐ અભયાયૈ નમઃ ।
ૐ ભયઘ્ન્યૈ નમઃ ।
ૐ ભીમનાદાયૈ નમઃ ।
ૐ ભયાનકમુખેક્ષણાયૈ નમઃ ।
ૐ ભિલ્લીશ્વર્યૈ નમઃ ।
ૐ ભીતિહરાયૈ નમઃ ।
ૐ ભદ્રદાયૈ નમઃ ।

ॐ ભદ્રકારિણ્યૈ નમઃ ।

ॐ ભદ્રેશ્વર્યૈ નમઃ ।

ॐ ભદ્રધરાયૈ નમઃ ।

ॐ ભદ્રાખ્યાયૈ નમઃ ।

ॐ ભાગ્યવર્ધિન્યૈ નમઃ ।

ॐ ભગમાલાયૈ નમઃ ।

ॐ ભગાવાસાયૈ નમઃ ।

ॐ ભવાન્યૈ નમઃ ।

ॐ ભવતારિણ્યૈ નમઃ ।

ॐ ભગયોન્યૈ નમઃ । ૮૦૦

ॐ ભગાકારાયૈ નમઃ ।

ॐ ભગસ્થાયૈ નમઃ ।

ॐ ભગરૂપિણ્યૈ નમઃ ।

ॐ ભગલિઙ્ગામૃતપ્રીતાયૈ નમઃ ।

ॐ ભકારાક્ષરમાતૃકાયૈ નમઃ ।

ॐ માન્યાયૈ નમઃ ।

ॐ માનપ્રદાયૈ નમઃ ।

ॐ મીનાયૈ નમઃ ।

ॐ મીનકેતનલાલસાયૈ નમઃ ।

ॐ મદોદ્ધતાયૈ નમઃ ।

ॐ મદોદ્ધૃતાયૈ  નમઃ । -

ॐ મનોન્માન્યાયૈ નમઃ ।

ॐ મેનાયૈ નમઃ ।

ॐ મૈનાકવત્સલાયૈ નમઃ ।

ॐ મધુમત્તાયૈ નમઃ ।

ॐ મધુપૂજ્યાયૈ નમઃ ।

ॐ મધુદાયૈ નમઃ ।

ॐ મધુમાધવ્યૈ નમઃ ।

ॐ માંસાહારાયૈ નમઃ ।

ॐ માંસપ્રીતાયૈ નમઃ । ૮૨૦

ॐ માંસભક્ષ્યાયૈ નમઃ ।

ॐ માંસદાયૈ નમઃ ।

ૐ મારાર્તાયૈ નમઃ ।

ૐ મત્સ્યરૂપાયૈ નમઃ ।

ૐ મત્સ્યધાત્રે નમઃ ।

ૐ મહત્તરાયૈ નમઃ ।

ૐ મેરુશૃઙ્ગાગ્રતુઙ્ગાસ્યાયૈ નમઃ ।

ૐ મોદકાહારપૂજિતાયૈ નમઃ ।

ૐ માતઙ્ગિન્યૈ નમઃ ।

ૐ મધુમત્તાયૈ નમઃ ।

ૐ મદમત્તાયૈ નમઃ ।

ૐ મદેશ્વર્યૈ નમઃ ।

ૐ મઞ્જાયૈ નમઃ ।

ૐ મજ્જાયૈ  નમઃ । -

ૐ મુગ્ધાનનાયૈ નમઃ ।

ૐ મુગ્ધાયૈ નમઃ ।

ૐ મકારાક્ષરભૂષણાયૈ નમઃ ।

ૐ યશસ્વિન્યૈ નમઃ ।

ૐ યતીશાન્યૈ નમઃ ।

ૐ યત્નકર્ત્ર્યૈ નમઃ ।  ૮૪૦

ૐ યજુઃપ્રિયાયૈ નમઃ ।

ૐ યજ્ઞધાત્ર્યૈ નમઃ ।

ૐ યજ્ઞફલાયૈ નમઃ ।

ૐ યજુર્વેદઋચામ્ફલાયૈ નમઃ ।

ૐ યશોદાયૈ નમઃ ।

ૐ યતિસેવ્યાયૈ નમઃ ।

ૐ યાત્રાયૈ નમઃ ।

ૐ યાત્રિકવત્સલાયૈ નમઃ ।

ૐ યોગેશ્વર્યૈ નમઃ ।

ૐ યોગગમ્યાયૈ નમઃ ।

ૐ યોગેન્દ્રજનવત્સલાયૈ નમઃ ।

ૐ યદુપુત્ર્યૈ નમઃ ।

ૐ યમઘ્ન્યૈ નમઃ ।

ૐ યકારાક્ષરમાતૃકાયૈ નમઃ ।

ॐ રત્નેશ્વર્યૈ નમઃ ।
ॐ રમાનાથસેવ્યાયૈ નમઃ ।
ॐ રથ્યાયૈ નમઃ ।
ॐ રજસ્વલાયૈ નમઃ ।
ॐ રાજ્યદાયૈ નમઃ ।
ॐ રાજરાજેશ્યૈ નમઃ । ૮૬૦
ॐ રોગહર્ત્ર્યૈ નમઃ ।
ॐ રજોવત્યૈ નમઃ ।
ॐ રત્નાકરસુતાયૈ નમઃ ।
ॐ રમ્યાયૈ નમઃ ।
ॐ રાત્ર્યૈ નમઃ ।
ॐ રાત્રિપતિપ્રભાયૈ નમઃ ।
ॐ રક્ષોઘ્ન્યૈ નમઃ ।
ॐ રાક્ષસેશાન્યૈ નમઃ ।
ॐ રક્ષોનાથસમર્ચિતાયૈ નમઃ ।
ॐ રતિપ્રિયાયૈ નમઃ ।
ॐ રતિમુખ્યાયૈ નમઃ ।
ॐ રકારાકૃતિશેખરાયૈ નમઃ ।
ॐ લમ્બોદર્યૈ નમઃ ।
ॐ લલજ્જિહ્વાયૈ નમઃ ।
ॐ લાસ્યતત્પરમાનસાયૈ નમઃ ।
ॐ લૂતાતન્તુવિતાનાસ્યાયૈ નમઃ ।
ॐ લક્ષ્મ્યૈ નમઃ ।
ॐ લજ્જાયૈ નમઃ ।
ॐ લયાલિન્યૈ નમઃ ।
ॐ લોકેશ્વર્યૈ નમઃ । ૮૮૦
ॐ લોકધાત્ર્યૈ નમઃ ।
ॐ લાટસ્થાયૈ નમઃ ।
ॐ લક્ષણાકૃત્યૈ નમઃ ।
ॐ લમ્બાયૈ નમઃ ।
ॐ લમ્બકચોલ્લાસાયૈ નમઃ ।
ॐ લકારાકારવર્ધિન્યૈ નમઃ ।

ૐ લિઙ્ગેશ્વર્યૈ નમઃ ।
ૐ લિઙ્ગલિઙ્ગાયૈ નમઃ ।
ૐ લિઙ્ગમાલાયૈ નમઃ ।
ૐ લસદ્દ્યુત્યૈ નમઃ ।
ૐ લક્ષ્મીરૂપાયૈ નમઃ ।
ૐ રસોલ્લાસાયૈ નમઃ ।
ૐ રામાયૈ નમઃ ।
ૐ રેવાયૈ નમઃ ।
ૐ રજસ્વલાયૈ નમઃ ।
ૐ લયદાયૈ નમઃ ।
ૐ લક્ષણાયૈ નમઃ ।
ૐ લોલાયૈ નમઃ ।
ૐ લકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ વારાહ્યૈ નમઃ । ૯૦૦
ૐ વરદાત્ર્યૈ નમઃ ।
ૐ વીરસુવે નમઃ ।
ૐ વીરદાયિન્યૈ નમઃ ।
ૐ વીરેશ્વર્યૈ નમઃ ।
ૐ વીરજન્યાયૈ નમઃ ।
ૐ વીરચર્વણચર્ચિતાયૈ નમઃ ।
ૐ વરાયુધાયૈ નમઃ ।
ૐ વરાકાયૈ નમઃ ।
ૐ વામનાયૈ નમઃ ।
ૐ વામનાકૃતયે નમઃ ।
ૐ વધૂતાયૈ નમઃ ।
ૐ વધકાયૈ નમઃ ।
ૐ વધ્યાયૈ નમઃ ।
ૐ વધ્યભુવે નમઃ ।
ૐ વાણિજપ્રિયાયૈ નમઃ ।
ૐ વસન્તલક્ષ્મ્યૈ નમઃ ।
ૐ વટુક્યૈ નમઃ ।
ૐ વટુકાયૈ નમઃ ।

ૐ વટુકેશ્વર્યૈ નમઃ ।
ૐ વટુપ્રિયાયૈ નમઃ । ૯૨૦
ૐ વામનેત્રાયૈ નમઃ ।
ૐ વામાચારૈકલાલસાયૈ નમઃ ।
ૐ વાર્તાયૈ નમઃ ।
ૐ વામ્યાયૈ નમઃ ।
ૐ વરારોહાયૈ નમઃ ।
ૐ વેદમાત્રે નમઃ ।
ૐ વસુન્ધરાયૈ નમઃ ।
ૐ વયોયાનાયૈ નમઃ ।
ૐ વયસ્યાયૈ નમઃ ।
ૐ વકારાક્ષરમાતૃકાયૈ નમઃ ।
ૐ શમ્ભુપ્રિયાયૈ નમઃ ।
ૐ શરચ્ચર્યાયૈ નમઃ ।
ૐ શાદ્વલાયૈ નમઃ ।
ૐ શશિવત્સલાયૈ નમઃ ।
ૐ શીતદ્યુતયે નમઃ ।
ૐ શીતરસાયૈ નમઃ ।
ૐ શોણોષ્ઠ્યૈ નમઃ ।
ૐ શીકરપ્રદાયૈ નમઃ ।
ૐ શ્રીવત્સલાઞ્છનાયૈ નમઃ ।
ૐ શર્વાયૈ નમઃ । ૯૪૦
ૐ શર્વવામાઙ્ગવાસિન્યૈ નમઃ ।
ૐ શશાઙ્કામલલક્ષ્મ્યૈ નમઃ ।
ૐ શાર્દૂલતનવે નમઃ ।
ૐ અદ્રિજાયૈ નમઃ ।
ૐ શોષહર્ત્ર્યૈ નમઃ ।
ૐ શમીમૂલાયૈ નમઃ ।
ૐ શકારાકૃતિશેખરાયૈ નમઃ ।
ૐ ષોડશ્યૈ નમઃ ।
ૐ ષોડશીરૂપાયૈ નમઃ ।
ૐ ષઢાયૈ નમઃ ।

ૐ ષોઢાયૈ નમઃ ।
ૐ ષડાનનાયૈ નમઃ ।
ૐ ષટ્કૂટાયૈ નમઃ ।
ૐ ષડ્રસાસ્વાદાયૈ નમઃ ।
ૐ ષડશીતિમુખામ્બુજાયૈ નમઃ ।
ૐ ષડાસ્યજનન્યૈ નમઃ ।
ૐ ષષ્ઠાયૈ નમઃ ।
ૐ ષણ્ઠાયૈ નમઃ । -
ૐ ષવર્ણાક્ષરમાતૃકાયૈ નમઃ ।
ૐ સારસ્વતપ્રસુવે નમઃ । ૯૬૦
ૐ સર્વાયૈ નમઃ ।
ૐ સર્વગાયૈ નમઃ ।
ૐ સર્વતોમુખાયૈ નમઃ ।
ૐ સમાયૈ નમઃ ।
ૐ સીતાયૈ નમઃ ।
ૐ સત્યૈ નમઃ ।
ૐ માત્રે નમઃ ।
ૐ સાગરાભયદાયિન્યૈ નમઃ ।
ૐ સમસ્તશાપશમન્યૈ નમઃ ।
ૐ સાલભઞ્જ્યૈ નમઃ ।
ૐ સુદક્ષિણાયૈ નમઃ ।
ૐ સુષુમ્ણૈ નમઃ ।
ૐ સુરસાયૈ નમઃ ।
ૐ સાધ્વ્યૈ નમઃ ।
ૐ સામગાયૈ નમઃ ।
ૐ સામવેદજાયૈ નમઃ ।
ૐ સત્યપ્રિયાયૈ નમઃ ।
ૐ સોમમુખ્યૈ નમઃ ।
ૐ સૂત્રસ્થાયૈ નમઃ ।
ૐ સૂતવલ્લભાયૈ નમઃ । ૯૮૦
ૐ સનકેશ્યૈ નમઃ ।
ૐ સુનન્દાયૈ નમઃ ।

ૐ સ્વવર્ગસ્થાયૈ નમઃ ।
ૐ સનાતન્યૈ નમઃ ।
ૐ સેતુભૂતાયૈ નમઃ ।
ૐ સમસ્તાશાયૈ નમઃ ।
ૐ સકારાક્ષરવલ્લભાયૈ નમઃ ।
ૐ હાલાહલપ્રિયાયૈ નમઃ ।
ૐ હેલાયૈ નમઃ ।
ૐ હાહારાવવિભૂષણાયૈ નમઃ ।
ૐ હાહાહૂહૂસ્વરૂપાયૈ નમઃ ।
ૐ હલધાત્ર્યૈ નમઃ ।
ૐ હલિપ્રિયાયૈ નમઃ ।
ૐ હરિનેત્રાયૈ નમઃ ।
ૐ ઘોરરૂપાયૈ નમઃ ।
ૐ હવિષ્યાહુતિવલ્લભાયૈ નમઃ ।
ૐ હં ક્ષં લં ક્ષઃ સ્વરૂપાયૈ નમઃ ।
ૐ સર્વમાતૃકપૂજિતાયૈ નમઃ ।
ૐ ૐ ઐં સૌઃ હ્રીં મહાવિદ્યાયૈ નમઃ ।
ૐ આં શાં ફ્રાં હૂં સ્વરૂપિણ્યૈ નમઃ । ૧૦૦૦

ઇતિ શ્રીશારિકાસહસ્રનામાવલિઃ સમ્પૂર્ણા ॥

ઇતિ શ્રીશારિકાદેવ્યા મન્ત્રનામસહસ્રકમ્ ॥

॥ ફલ શ્રુતિ ॥

પુણ્યં પુણ્યજનસ્તુત્યં નુત્યં વૈષ્ણવપૂજિતમ્ ।
ઇદં યઃ પઠતે દેવિ શ્રાવયેદ્યઃ શ઼ૃણોતિ ચ ॥ ૧॥

સ એવ ભગવાન્ દેવઃ સત્યં સત્યં સુરેશ્વરિ ।
એકકાલં દ્વિકાલં વા ત્રિકાલં પઠતે નરઃ ॥ ૨॥

વામાચારપરો દેવિ તસ્ય પુણ્યફલં શ઼ૃણુ ।
મૂકત્વં બધિરત્વં ચ કુષ્ઠં હન્યાચ્ચ શ્વિત્રિકામ્ ॥ ૩॥

વાતપિત્તકફાન્ ગુલ્માન્ રક્તસ્રાવં વિષૂચિકામ્ ।
સદ્યઃ શમયતે દેવિ શ્રદ્ધયા યઃ પઠેન્નિશિ ॥ ૪॥

અપસ્મારં કર્ણપીડાં શૂલં રૌદ્રં ભગન્દરમ્ ।
માસમાત્રં પઠેદ્યસ્તુ સ રોગૈર્મુચ્યતે ધ્રુવમ્ ॥ ૫॥

ભૌમે શનિદિને વાપિ ચક્રમધ્યે પઠેદ્યદિ ।
સદ્યસ્તસ્ય મહેશાનિ શારિકા વરદા ભવેત્ ॥ ૬॥

ચતુષ્પથે પઠેદ્યસ્તુ ત્રિરાત્રં રાત્રિવ્યત્યયે ।
દત્ત્વા બલિં સુરાં મુદ્રાં મત્સ્યં માંસં સભક્તકમ્ ॥ ૭॥

વબ્બોલત્વગ્રસાકીર્ણં શારી પ્રાદુર્ભવિષ્યતિ ।
યઃ પઠેદ્દેવિ લોલાયાં ચિતાયાં શવસન્નિધૌ ॥ ૮॥

પાયમ્પાયં ત્રિવારં તુ તસ્ય પુણ્યફલં શ ૃણુ ।
બ્રહ્મહત્યાં ગુરોર્હત્યાં મદ્યપાનં ચ ગોવધમ્ ॥ ૯॥

મહાપાતકસઙ્ઘાતં ગુરુતલ્પગતોદ્ભવમ્ ।
સ્તેયં વા ભ્રૂણહત્યાં વા નાશયેન્નાત્ર સંશયઃ ॥ ૧૦॥

સ એવ હિ રમાપુત્રો યશસ્વી લોકપૂજિતઃ ।
વરદાનક્ષમો દેવિ વીરેશો ભૂતવલ્લભઃ ॥ ૧૧॥

ચક્રાર્ચને પઠેદ્યસ્તુ સાધકઃ શક્તિસન્નિધૌ ।
ત્રિવારં શ્રદ્ધયા યુક્તઃ સ ભવેદ્ભૈરવેશ્વરઃ ॥ ૧૨॥

કિઙ્કિં ન લભતે દેવિ સાધકો વીરસાધકઃ ।
પુત્રવાન્ ધનવાંશ્ચૈવ સત્યાચારપરઃ શિવે ॥ ૧૩॥

શક્તિં સમ્પૂજ્ય દેવેશિ પઠેત્ સ્તોત્રં પરામયમ્ ।
ઇહ લોકે સુખં ભુક્ત્વા પરત્ર ત્રિદિવં વ્રજેત્ ॥ ૧૪॥

ઇતિ નામસહસ્રં તુ શારિકાયા મનોરમમ્ ।
ગુહ્યાદ્ગુહ્યતમં લોકે ગોપનીયં સ્વયોનિવત્ ॥ ૧૫॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે
શ્રીશારિકાયાઃ સહસ્રનામાવલિઃ સમાપ્તા ॥

There are nine instances of name devI to be considered
in different context.

Encoded and proofread by DPD, NA, PSA Easwaran

*shrIshArikAsahasranAmAvaliH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*